National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(66): 196-200
© 2026 NJHSR
www.sanskritarticle.com

**Adweta Dash**
Research Scholar,
Department of Sanskrit,
Pali & Prakrit, Visva-Bharati,
Santiniketan

**Correspondence:**
**Adweta Dash**
Research Scholar,
Department of Sanskrit,
Pali & Prakrit, Visva-Bharati,
Santiniketan

# संस्कृतवाङ्मये 'छायापरम्परा'- एकं विश्लेषणात्मकम् अध्ययनम्

**Adweta Dash**

**शोधसारः**

प्राचीनभारतीयसाहित्यस्य नाट्यपरम्परायाश्च प्रमुखा विशेषता तस्य बहुभाषिकता तथा च सामाजिकसांस्कृतिकस्तरीकरणस्य यथार्थचित्रणम् अस्ति। अस्मिन् बहुभाषिकपरिदृश्ये 'छायापरम्परा' एका अत्यन्ताद्वितीया, भाषातात्विका, संरचनात्मककठोरा अनुवादपद्धतिरूपेण प्रतिभाति। संस्कृतनाटकेषु पुनश्च स्वतन्त्रप्राकृतकाव्येषु प्राकृतपाठस्य समानान्तरं क्रियमाणं शब्दशः संस्कृतोद्रूपणं 'छाया' इति नाम्ना अभिधीयते। संस्कृतवाङ्मये एषा 'छायापरम्परा' एका अतीव विसिष्टा, प्रमुखा च साहित्यिकभाषातात्विकसांस्कृतिकपरम्परा वर्तते। अस्मिन् शोधप्रपत्रे छायायाः तात्विकं, स्वरूपालोचनात्मकं, व्यावहारिकं च विश्लेषणात्मकम् अध्ययनं प्रस्तुतोऽस्ति। साधारणतया 'छाया' शब्दः प्रतिबिम्बस्य, सादृश्यस्य, अनुकरणस्य वा द्योतको भवति, परन्तु संस्कृतनाट्यशास्त्रे काव्यशास्त्रे च अस्य सगम्भीरं महत्त्वं परिदृश्यते। विशेषतः संस्कृतनाटकेषु प्राकृतभाषायाः संवादानां संस्कृतीकरणाय 'छाया' इति प्रविधेः उपयोगः क्रियते, येन मूलभावस्य रक्षणं पाठकानां सौकर्यञ्च भवति। अस्मिन् अध्ययने छायापरम्परायाः उद्भवः, तस्याः विकासात्मकः क्रमः, विभिन्नग्रन्थेषु तस्याः प्रासङ्गिकता च वैज्ञानिकदृष्ट्या समीक्षिता अस्ति। अत्र कालिदास-शूद्रक-राजशेखरादीनां मूलग्रन्थेभ्यः प्रचुरोदाहरणानि दत्त्वा अस्याः परम्परायाः प्रासंगिकता, तुलनात्मक-साहित्ये अस्याः स्थानं, सांस्कृतिकसंरक्षणे तस्याः कालजयी महत्त्वं च रेखाङ्कितं वर्तते।

**वीजशब्दाः-**

छायापरम्परा, प्राकृतम्, संस्कृतनाटकम्, अनुवाददर्शनम्, गाथासप्तशती, कर्पूरमञ्जरी, भाषाविज्ञानम्, नाट्यशास्त्रम्।

**प्रस्तावना**

भारतीयसमृद्धसाहित्येतिहासः विविधभाषासमन्वयस्य सजिवं प्रतीकम् अस्ति। प्राचीनकाले भाषाणां प्रचलनं क्षेत्रविशेषे सीमावद्धन भुत्वा तत्समाजस्य शिक्षायाः प्रगतौ अपि निर्भरम् आसीत्। अस्मिन् वैविध्यपूर्णवातावरणे द्वे मुख्यधारप्रवाहिते अभवताम्। एका धारा संस्कृतभाषायाः आसीत्। सा भाषा परिमार्जिता भूत्वा बुद्धिशालिनां शास्त्राणां शासनस्य च गौरवास्पदपदम् अलङ्करोति स्म। अपरा धारा प्राकृतभाषायाः आसीत्। सा धारा सर्वसामान्यानां हृदयेभ्यः प्रसूता भूत्वा लोकसंस्कृतेः दैनन्दिनसंवादस्य च सुदृढोऽधारः आसीत्। एतां सामाजिकभाषिकीं वास्तविकतां स्वीकृत्य आचार्यभरतमुनिः स्वकीये प्रसिद्धालङ्कारग्रन्थे नाट्यशास्त्रे नाटकस्य रङ्गमञ्चे एतस्य समन्वयस्य अनिवार्यतां प्रकाशितवान्। आचार्यभरतमुनिः स्वकीये ग्रन्थे नाट्यशास्त्राख्ये रङ्गमञ्चे अस्य भाषायथार्थस्य सामाजिकवैविध्यस्य च अनिवार्यतां तथा संस्कृतप्राकृतादिभाषाप्रभेदानां वर्णनावसरे दृढतया उद्घोष्य उलिखतवान् यथा-

*"एवमेतद्तु विज्ञेयं संस्कृतं प्राकृतं तथा।*
*अत ऊर्ध्वं प्रवक्ष्यामि देशभाषाविकल्पनम्॥"*
*"भाषा चतुर्विधा ज्ञेया दशरूपप्रयोगतः।*
*संस्कृतं प्राकृतश्चैव यत्र पाठ्यं प्रयुज्यते॥"*
*"अतिभाषाऽर्यभाषा च जातिभाषा तथैव च।*
*तथा योन्यन्तरी चैव भाषा नाट्य प्रकीर्तिता॥"*
*"अतिभाषा तु देवानामार्थभाषा तु भूभुजाम्।*
*संस्कारगुणसंयुक्ता सप्तद्वीपप्रतिष्ठिता॥"*
*"द्विविधा जातिभाषा च प्रयोगे समुदाहृता।*
*म्लेच्छशब्दोपचारा च भारतं वर्षमाश्रिता॥"*
*"अथ योन्यन्तरी भाषा ग्राम्यारण्यपशूद्भवा।*
*नाना-विहङ्गजा चैव नाट्यधर्मीप्रतिष्ठिता॥"*
*"जातिभाशाश्रयं पाठ्यं द्विविधं समुदाहृतम्।*
*प्राकृतं संस्कृतश्चैव चातुर्वर्ण्यसमाश्रयम्॥"[1]*

पुनश्च पात्रानुरूपभाषाप्रयोगं स्पष्टयन् सः कथयति—

*"धीरोद्धते सललिते धीरोदात्ते तथैव च।*
*धीरप्रशान्ते च तथा पाठ्यं योज्यन्तु संस्कृतम्॥"*
*"एतेषामपि सर्वेषां नायकानां प्रयोगजम्।*
*कारणव्यपदेशेन प्राकृतं सम्प्रयोजयेत्॥"*
*"ऐश्वर्येण प्रमत्तानां दारिद्र्ये प्लुतात्मनाम्।*
*उन्मत्तस्यापि पठतः संस्कृतं न प्रयोजयेत्॥"*
*"व्याजलिङ्गप्रविष्टानां श्रमणानां तपस्विनाम्।*
*भिक्षुचक्रचराणाञ्च प्राकृतं सम्प्रयोजयेत्॥"*
*"बाले गृहोपसृष्टे च स्त्रीणां स्त्रीप्रकृतौ तथा।*
*नीचे मत्ते सलिङ्गे च प्राकृतं पाठ्यमिष्यते॥"[2]*

अनेन नाट्यशास्त्रीयनियमेन संस्कृतनाटकेषु शौरसेनी-महाराष्ट्री-मागधी-अर्धमागधी-अवन्ती-पैशाची-इत्यादिप्राकृतभाषाणां उपभाषाणां च व्यापकप्रवेशः अभवत्। नाटके राजा, अमात्यः, ऋषयश्च संस्कृतं कथयन्ति स्म, किन्तु राज्ञी, नायिका, सख्यः, विदूषकः, सेवकाश्च प्राकृतस्य विभिन्नरूपाणां प्रयोगं कुर्वन्ति स्म। परन्तु कालान्तरे मध्यकाले यदा प्राकृतभाषाणां लोकप्रचलनं शिथिलं जातम् एवं समाजमुख्यरूपेण संस्कृतकेन्द्रितः तथा आधुनिक-आर्यभाषाभिः प्रभावितः अभवत्, तदा नाट्यग्रन्थेषु निहितप्राकृतसंवादान् काव्यसौन्दर्यं च सम्यकवगन्तुं पाठकानां कृते महती काठिन्यता समुत्पन्ना। अस्यामेव ऐतिहासिकावश्यकतायां 'छायापरम्परायाः' प्रारम्भाभवत्। 'छाया' इत्यस्य शब्दस्य अर्थः मूलप्राकृतशब्दस्य वाक्यस्य वा सशब्द संस्कृतद्विरूपता, या मूलेप्राकृतेन सह तस्य प्रतिबिम्बवत् विलसति, येन मूलपाठस्य अर्थहानिः न भवेत्।

**छायायाः स्वरूपम्**

साहित्यिक-समीक्षा-सन्दर्भेषु 'छाया' इति शब्दस्य चयनं परमवैज्ञानिकं दार्शनिकं च वर्तते। दृश्यजगति यथा प्रकाशस्य साहाय्येन कस्यचित् भौतिकपिण्डस्य प्रतिकृतिः तस्यैव पिण्डस्य आकारं, गतिं, अङ्गप्रत्यङ्गानां विन्यासम् च अपरिवर्तितरूपेण अनुसरति, तथैव साहित्यवाङ्मयजगति प्राकृतभाषायाः पदानां संस्कृते यः रूपवैज्ञानिकः अक्षरशः च अनुवादः विधीयते, सा 'छाया' इति पारिभाषिकनाम्ना उच्यते। अयम् अनुवादप्रकारः आधुनिका-नुवादविज्ञानस्य शब्दानुवादस्य तथा रूपविज्ञानीया-नुवादस्य सिद्धान्तान् पूर्णतः चरितार्थं करोति। छायाकारस्य अनुवादकस्य वा सम्मुखे स्वतन्त्रानुवादकवत् स्वतन्त्रता न भवति। तस्य कृते मुख्यं आव्हानम् भवति यत् सः मूलप्राकृतवाक्यानां वाक्यविन्यासान्, शब्दक्रमालङ्कारान् विना परिवर्तनं संस्कृतरूपेण रूपायितं कुर्यात्।

**संस्कृतनाट्यसाहित्ये छायापरम्परा**

संस्कृतनाटकानां कलात्मकसौन्दर्यं रसनिष्पत्तिश्च प्राकृतसंवादेषु तेषां समानान्तरसंस्कृतछायायां च एव पूर्णतः आश्रिताः सन्ति। यदि नाटकेभ्यः छायां निष्कासयामः, तर्हि नाटकानां मुख्यरसानां शृङ्गार-हास्य-करुणादयरसानाम् रसास्वादनं सहृदयानां कृते असम्भवं भवेत्, यतोहि नाटकस्य प्राणाधारभूताः नायिकाः, सख्यः, हास्योत्पादकः विदूषकश्च सर्वदा प्राकृतमेव भाषन्ते। अतः अत्र वयं कतिपयप्रसिद्धनाटकानाम् उपस्थापना क्रियते यत्र प्राकृतभाषायाः प्रयोगः भवेत् एवं संस्कृते तस्य छायायाः वर्णना भवेत्।

**कालिदासस्य अभिज्ञानशाकुन्तले छायापरम्परा**

महाकविकालिदासस्य नाटकेषु प्राकृतस्य माधुर्यमयीशैली प्राप्यते। 'अभिज्ञानशाकुन्तलस्य' प्रथमे अङ्के यदा तपोवने विचरणशीला शकुन्तला एवं सख्यौ अनुसया-नियम्बदायोः कथोपकथने छायापरम्परां द्रष्टुं शक्नुमः। यथा कालिदासप्रयुक्तः प्राकृतभाषाशैली-

***मूलप्राकृताठः-*** *(शकुन्तला) "एसो वादेरिदपल्लवङ्गुलीहिं तुवरेदि विअ मं केसररुक्खओ। जाव णं सम्भावेमि।"*

***संस्कृतछाया-*** *"एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः। यावदेनं सम्भावयामि।"*

***मूलप्राकृताठः-*** *(प्रियंवदा) "हला साउन्तले, एत्थ एव्व दाव मुहुत्तं चिट्ठ।"*

***संस्कृतछाया-*** *"हला शकुन्तले, अत्रैव तावन्मुहूर्तं तिष्ठ।"*

***मूलप्राकृताठः-*** *(शकुन्तला) "कि णिमित्तं?"*

***संस्कृतछायाः-*** *"किं निमित्तम्?"*

***मूलप्राकृताठः-*** *(प्रियंवदा) "जाव तुए उवगदाए लदासनाथइव अअं केसररुक्खओ पडिभादि।"*

***संस्कृतछाया-*** *"यावत् त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति।"*

***मूलप्राकृताठः-*** *(शकुन्तला) "अदो क्खु प्रियंवदासि त्वम्।"*

***संस्कृतछाया-*** *"अतः खलु प्रियंवदासि त्वम्।"* [3]

अत्र छायाकारस्य सूक्ष्मदृष्टिः अवलोकनीया। प्राकृतस्य 'एसो' इत्यस्य संस्कृते 'एष', 'सम्भावेमि' इत्यस्य 'सम्भावयामि', '*हला*' इत्यस्य '*हला*' तथा '*साउन्तले*' इत्यस्य '*शकुन्तले*' इति रूपान्तरणं कृतम्। अत्र प्राकृतस्य प्रारूपं संस्कृतछायापरम्परायाः परिप्रेक्ष्ये सर्वथा शुद्धरूपेण रक्षितः।

**शूद्रकस्य मृच्छकटिकप्रकरणे छायापरम्परा**

महाकविशूद्रकविरचितं 'मृच्छकटिकम्' एकं सुप्रसिद्धं प्रकरणम् अस्ति। यत्र समाजस्य यथार्थचित्रं दृश्यते। अत्र सूत्रधार-नट्योः कथोपकथने प्राकृतस्य तथा कस्याः संस्तृतछायायाः प्रयोगः अवश्यमेव उल्लेखनीयय। एतयोः संवादं विना छायाम् अवगन्तुं नैव शक्यते। यथा-

**मूलप्राकृताठः-** *"अविद अविद भोः! चिरसंगीदोवासणेण सुक्खपोक्खरनाला इं विअ मे बुभुक्खाए मिलाणाई अंगाई, ता जाव गेहं गदुअ आणामि, अत्थि किंपि कटुंबिणीए उववादिदं ण वेत्ति। [परिक्रम्यावलोक्य च] एदं तं अम्हाणं गेहं, ता पविसामि। [प्रविश्यावलोक्य च] हीमाणहे! किं णु क्खु अम्हाणं गेहे अवरं विअ संविहाणं वट्टदि! आयामितंडुलोदप्पवाहा रच्छा, लोहकडाहपरिवत्तणकसणसारा किदविसेसा विअ जुअदी अहिंदअरं सोहदि भूमी, सिणिद्धगंधेण उद्दीवती विअ अहिअं बाधदि मं बुभुक्खा; ता किं पुव्वविहिदं णिहाणं उववण्णं। [उववण्णं] भवे? आदु अहं ज्जेव बुभुक्खादो ओदणमअं जीअलोअं पेक्खामि! णत्थि किल पादरासो अम्हाणं गेहे, पाणाच्चअं बाधेदि मं बुभुक्खा, इध सव्वं णवं विअ संविहाणं वट्टदि, एका वण्णअं पीसेदि, अवरा सुमणाई गुंफेदि। [विचिन्त्य] किं णेदं? भोदु, कुटुंबिणिं सद्दाविअ परमत्थं जाणिस्सं। [नेपथ्याभिमुखमवलोक्य] अज्जे! इदो दाव।"* [4]

**संस्कृतछाया-** *"अविद अविद भोः! चिरसंगीतोपासनेन शुष्कपुष्करनालानीव मे बुभुक्षया म्लानानि अङ्गानि, तत् यावत् गृहं गत्वा जानामि, अस्ति किमपि कुटुम्बिन्या उपपादितं न वेति। परिक्रम्यावलोक्य च) इदं तदस्माकं गृहं, तत् प्रविशामि। (प्रविश्यावलोक्य च) आश्चर्यम्! किं नु खलु अस्माकं गृहे अपरमिव संविधानकं वर्त्तते! आयामिततण्डुलोदकप्रवाहा रथ्या, लौहकटाहपरिवर्त्तनकृष्णसारा कृतविशेषेव युवती अधिकतरं शोभते भूमिः, स्निग्धगन्धेन उद्दीप्यमानेव अधिकं बाधते मां बुभुक्षा; तत् किं पूर्वविहितं निधानं उपपन्नं भवेत्? अथवा, अहमेव बुभुक्षातः ओदनमयं जीवलोकं प्रेक्षे! नास्ति किल प्रातराशोऽस्माकं गृहे, प्राणात्ययं बाधते मां बुभुक्षा; इह सर्वं नवमिव संविधानकं वर्त्तते; एका वर्णकं पिनष्टि, अपरा सुमनसो गुम्फति। (विचिन्त्य) किं नु इदम्? भवतु, कुटुम्बिनीं शब्दापयित्वा परमार्थं ज्ञास्यामि (नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत्!"* [5]

***मूलप्राकृताठः-*** *"नटी---[प्रविश्य] अज्ज! इमं म्हि।"*

***संस्कृतछाया-*** *"आर्ये! इयमस्मि।"*

***मूलप्राकृताठः-*** *"सूत्र०---अज्जे! साअदं दे।"*

***संस्कृतछाया-*** *"आर्ये! स्वागतं ते।"*

***मूलप्राकृताठः-*** *"नटी---आणाबेदु अज्जो, को णिओओ अणुचिट्ठोअदु त्ति?"*

***संस्कृतछाया-*** *"आज्ञापयतु आर्यः, को नियोगोऽनुष्ठीयतामिति।"* [6]

अत्र प्राकृतस्य नियमानुसारं 'गदुअ' स्थाने 'गत्वा' तथा 'आणामि' स्थाने 'जानामि', 'म्हि' स्थाने 'अस्मि' आदि प्रयुक्तमस्ति। छायाकारेण एतान् सर्वान् क्लिष्टशब्दान् संस्कृतस्य मानकरूपे परिवर्त्य पाठकाय नाट्यप्रवाहः सुगमः सरसश्च कृतः।

**स्वतंत्रप्राकृतकाव्येषु छायापरम्परा**

छायापरम्परायाः उपयोगः केवलं नाटकानां गद्यमयेषु संवादेषु एव सीमितः नासीत्। प्राचीनभारतीयसाहित्ये संपूर्णरूपेण प्राकृतभाषायां लिखितानां महाकाव्यानां, खण्डकाव्यानां, मुक्तककाव्यानां च एकासुसमृद्धादीर्घा च शृङ्खला वर्तते। एतेषां ग्रन्थानां साहित्यिकम् अस्तित्त्वं रक्षितुं 'संस्कृतछाया' आधारशिला इव कार्यं अकरोत्। कतिपयानां प्रसिद्धप्राकृतकाव्यानाम् आलोचना मया क्रियते-

**गाहासत्तसई (गाथासप्तशती) - मुक्तककाव्यम्**

सातवाहनवंशस्य राज्ञो हालस्य सङ्कलनमिदं महाराष्ट्रीप्राकृतस्य शृङ्गाररसस्वादनयोग्यं सर्वोत्कृष्टं निदर्शनमस्ति। अस्मिन् जनजीवनस्य, कृषकाणां, ग्रामीणनारीणां च सजीवोरूपं चित्रितम्। टीकाकारः पीताम्बरः, भुवनपालश्च अस्य प्रत्येकस्याः गाथायाः संस्कृतछायां अलिखताम्, येन अस्य काव्यस्य व्याप्तिः राजदरबारेषु विद्वत्सभासु च अभवत्।

**मूलप्राकृतगाथा (आर्याछन्दसि):-**

*"अमिअं पाउअकव्वं पढिउं सोउं अ जे ण आणन्ति।*

*कामस्स तत्ततन्तिं कुणन्ति ते कहँ ण लज्जन्ति॥"*

**संस्कृतछाया-**

*“अमृतं प्राकृतकाव्यं पठितुं श्रोतुं च ये न जानन्ति।*

*कामस्य तत्त्वचिन्तां कुर्वन्ति ते कथं न लज्जन्ते॥”*[7]

अस्यां गाथायां महाकविहालः उद्घोषयति प्राकृतकाव्यं ‘अमृततुल्यं’ भवति। छायाकारेण मूलपाठस्य ‘पाउअ’ इत्यस्य ‘प्राकृत’, ‘कुणन्ति’ इत्यस्य ‘कुर्वन्ति’ इति शब्दानुवादं कृत्वा आर्याछन्दसः मात्रामर्यादां यथावत् संरक्षितम्, यत् कस्यचित् अनुवादकस्य कृते परमसाधनायाः विषयः अस्ति।

**कर्पूरमञ्जरी (पूर्णप्राकृतनाटकम् - सट्टकम्)**

कनौजराज्याश्रितः महाकविराजशेखरः नवम-दसम-शताब्द्यां ‘कर्पूरमञ्जरी’ नामकनाटकं पूर्णतः प्राकृतभाषायाम् अलिखत्, यतोहि सः प्राकृतं कोमलं मन्यते स्म। सः स्वयमेव प्राकृतस्य श्रेष्ठताम् उपपादयन् अलिखत्-

***मूलप्राकृताठः-***

*“अत्थविसेसा ते चिअ सद्दा ते चेअ परिणमंता वि।*

*उत्तिविसेसो कव्वं भासा जा होई सा होउ॥”*

***संस्कृतछाया-***

*“अर्थविशेषास्त एव शब्दास्त एव परिणमन्तोऽपि।*

*उक्तिविशेषः काव्यं भाषा या भवति सा भवतु॥”*[8]

***मूलप्राकृताठः-***

*“परुसा सक्कअवंधा पाउअवंधो वि होई सुउमारो।*

*पुरिसमहिलाणँ जेत्तिअमिहंतरं तेत्तिअमिमाणं॥”*

***संस्कृतछाया-***

*“परुषाः संस्कृतगुम्फाः प्राकृतगुम्फोऽपि भवति सुकुमारः।*

*पुरुषमहिलानां यावदिहान्तरं तेषु तावत्॥”*[9]

अत्र काव्यलक्षणेऽपि राजशेखरः प्राकृतस्य प्राधान्यता प्रतिपादति। राजशेखरस्य मतमासीत् यत् संस्कृतबन्धाः काव्यमहाकाव्यादिन् पुरुषाणाम् इव परुषाः कठोराः वा भवन्ति, प्राकृतबन्धाश्च ललनानामिव सुकुमाराः कोमलाः च भवन्ति। नारायणवासुदेव-सदृशैरचायैः अस्य ग्रन्थस्य संपूर्णासंस्कृतछाया विरचिता, येन विना अद्यतनविद्वद्भिः अस्य ग्रन्थस्य रसास्वादनं सर्वथा दुष्करम् आसीत्।

**छायापरम्परायाः भाषावैज्ञानिकं सांस्कृतिकं च महत्त्वम्**

अस्मिन् शोधपत्रे छायापरम्परायाः गभीरं परिशीलनं कृत्वा ज्ञायते यत् इयं पद्धतिः केवलं मात्रसाहित्यारसास्वादनस्य साधनं नासीत्, प्रत्युतः अस्याः छायापरम्परायाः पृष्ठे भवति सुदृढः भाषावैज्ञानिकः दृष्टिकोणः। निहितोऽस्ति सांस्कृतिक-एकात्मतायाः भावना।

तेषाम् अद्भूतां व्याकरणक्षमतां लोकभाषाप्रीतिं च ज्ञापयति। अद्यतने जागतिकीकरणस्य युगे, यत्र विविधानां स्थानीयलोक-

**ध्वनिपरिवर्तने छायापरम्परा**

आधुनिकतुलनात्मकभाषाविज्ञानस्य दृष्ट्या छायापरम्परा एका सजीवप्रयोगशाला अस्ति। अत्र वयं प्रत्यक्षं द्रष्टुं शक्यते यत् कथं संस्कृतस्य ‘तत्सम’ शब्दाः प्राकृतभाषासु गत्वा अपभ्रंशिताः अथवा ‘तद्भव’ रूपाणि अधारयन्। छाया एतयोः द्वयोः संस्कृतप्राकृत-भाषयोः रूपं समानान्तरं प्रस्तौति। कतिपयोदाहरणानि यत् मया उपरोक्तश्लोकेषु उपस्थापितम् यथा-

*अमिअं (संस्कृतम्) -> अमृतं (प्राकृतम्)*

*पढिउं (संस्कृतम्) -> पठितुं (प्राकृतम्)*

*सोउं (संस्कृतम्) -> श्रोतुं (प्राकृतम्)*

*कुणन्ति (संस्कृतम्) -> कुर्वन्ति (प्राकृतम्)*

*सक्कअ (संस्कृतम्) -> संस्कृत (प्राकृतम्)*

*सुकुमारः (संस्कृतम्) -> सुउमारो (प्राकृतम्)*

*कव्वं (संस्कृतम्) -> काव्यं (प्राकृतम्)*

*भासा (संस्कृतम्) -> भाषा (प्राकृतम्)*

अनेन भाषाविद्भिः मध्यकालीनार्यभाषाणां विकासयात्रां ज्ञातुं सुलभसाहाय्यं प्राप्यते।

**प्राचीनज्ञानस्य संरक्षणाय छायापरम्परा**

इयं परम्परा एतस्य ऐतिहासिकप्रमाणं प्रदाति यत् प्राचीनभारते भाषां प्रति समादरभावः आसीत्। यदि संस्कृतस्य पार्श्वे उच्चबौद्धिकविमर्शः, दर्शनं, नीतिशास्त्रं च आसीत्, तर्हि प्राकृतस्य पार्श्वे जनसामान्यस्य हृदयस्पन्दनं, लोकसंस्कृतिः, प्रकृतेः सुगन्धश्च आसीत्। छायापरम्परा एतौ द्वौ वर्गौ परस्परं मेलयित्वा एकां समन्वितां ‘अखण्डचेतनां’ निर्मितवती। यदि जैनधर्मस्य प्राचीनागम-ग्रन्थानां,आचार्यकुन्दकुन्दाचार्यस्य ‘समयसार’,‘प्रवचनसार’ सदृशानां वहुप्राकृतशौरसेनीग्रन्थानां संस्कृतछायाः प्रकृष्टाः टीकाश्च अमृतचन्द्र-सूरि-जयसेन-प्रभृतिभिः आचार्यैः न लिखिताः स्युः, तर्हि कालक्रमेण प्राकृतस्य अध्ययनाभावात् एते महार्हाः दार्शनिकग्रन्थाः दुर्बोधाः अववोधहिना भूत्वा लुप्ताः अभविष्यन्। अतः छायापरम्परा ज्ञानस्य संरक्षिकारूपिणी अस्ति।

**निष्कर्षः**

उपरिविचारितप्रचुरशास्त्रीयविश्लेषणस्य आधारेण दृढतया इदं निष्कर्षं प्रतिपादितं भवति यत् ‘छायापरम्परा’ भारतीयअनुवाद-शास्त्रस्य एका अत्यन्ताद्वितीया, गभीरा, कालजयी च शास्त्रीयविधा वर्तते। इयम् अनुवादस्य आधुनिकानां वैज्ञानिक-सिद्धान्तानां प्राचीनकाले एव व्यावहारिकरूपेण प्रयोक्तुं कश्चन श्लाघ्यः सफलश्च प्रयासः आसीत्। छायाकारैः मूललेखकस्य रचनात्मकतायाः, छन्दोबद्धतायाः, रसभावस्य, भाषागतप्राणस्य च पूर्णम् आदरं कुर्वद्भिः लक्ष्यभाषायां (संस्कृते) यः स्वच्छः दर्पणः निर्मितः, सः भाषाणां विलोपनस्य महान् संकटः दृश्यते, प्राचीनभारतस्य इयं ‘छायापरम्परा’ इमां महतीं शिक्षां ददाति यत् कथम्

अनुवादमाध्यमेन लोकसाहित्यं, प्रान्तीयाज्ञानकोशं, विस्मृतां संस्कृतिं च नवजीवनं प्रदाय अमरत्वं स्थायित्वं प्रदातुं शक्यते। अतः आधुनिकानुवादे छाया परम्परा महतीं भूमिका साधयति इति नास्तिसंशयः।

**अन्त्यटिप्पणी**

१. भरतमुनि, *नाट्यशास्त्रम् (द्वितीयो भागः),* सम्पादक एवं व्याख्याकार बाबूलाल शुक्ल शास्त्री (वाराणसी: चौखम्बा संस्कृत संस्थान, वि. सं. २०३५), अध्याय १८, कारिकासंख्या २५-३०, पुटः ३३५-३३६।

२. तत्रैव, अध्याय १८, कारिकासंख्या ३१-३५, पुटः ३३७-३३८।

३. कालिदासः, *अभिज्ञानशाकुन्तलम्,* सम्पादकौ डॉ. राजदेव मिश्रः डॉ. सुचिता राय च (फैजाबाद: घनश्यामदास एण्ड सन्स, २०००), प्रथमोऽङ्कः, पुटः १३०– १३१।

४. शूद्रकः, *मृच्छकटिकम्* ('भावप्रकाशिका' संस्कृत-हिन्दी-व्याख्या), प्रो० जयशङ्करलाल त्रिपाठी (वाराणसी: कृष्णदास अकादमी, २००२), प्रथमोऽङ्कः, पुटः २२।

५. तत्रैव, पुटः २२-२३।

६. तत्रैव, पुटः २५।

७. सातवाहन, हालः। *गाथासप्तशती (संस्कृतगाथासप्तशती)।* भट्टश्रीमथुरानाथशर्मणा संग्रथिता स्वविचरितव्यङ्ग्यसर्वङ्कषा-व्याख्यया संवलिता च, मोतीलाल बनारसीदास, १९७३, कारिका-२, पुटः २।

८. राजशेखरः। *कर्पूरमञ्जरी। 'मकरन्द' संस्कृत-हिन्दीव्याख्यया हिन्दीरूपान्तरेण च संवलिता,* सम्पादकः श्री रामकुमार आचार्यः, चौखम्बा विद्या भवन, १९५५, कारिका ७, पुटः ८-९।

९. तत्रैव, कारिका-८ पुटः ९।

**सहायकग्रन्थसूची**


कालिदासः। *अभिज्ञानशाकुन्तलम्।* सम्पादकौ व्याख्याकारौ च डॉ. राजदेव मिश्रः डॉ. सुचिता राय च, घनश्यामदास एण्ड सन्स, २०००।

कीथ, ए.बी. *द संस्कृत ड्रामा: इट्स ओरिजिन, डेवलपमेंट, थ्योरी एंड प्रैक्टिस (The Sanskrit Drama),* ऑक्सफोर्ड यूनिवर्सिटी प्रेस, लंदन, १९२४।

जैनः, डॉ. जगदीशचन्द्रः। *प्राकृत साहित्य का इतिहास,* चौखम्बा विद्याभवन, वाराणसी, १९६१।

भरतमुनि। *नाट्यशास्त्रम् (द्वितीयो भागः)।* सम्पादकः व्याख्याकारः च बाबूलाल शुक्ल शास्त्री, चौखम्बा संस्कृत संस्थान, वि. सं. २०३५।

राजशेखरः। *कर्पूरमञ्जरी।* सम्पादकः श्री रामकुमार आचार्यः, 'मकरन्द' संस्कृत-हिन्दीव्याख्यया संवलिता, चौखम्बा विद्या भवन, १९५५।

रामचन्द्रः, गुणचन्द्रः च। *नाट्यदर्पणम् (हिन्दीव्याख्यासहितम्),* प्रधानसंपादकः:डॉ०नगेन्द्रः, व्याख्याकारः: आचार्यविश्वेश्वरसिद्धान्त-शिरोमणिः, हिन्दीविभागः, दिल्लीविश्वविद्यालयः, १९६१।

शूद्रकः। *मृच्छकटिकम् ('भावप्रकाशिका' संस्कृत-हिन्दी-व्याख्योपेतम्)।* व्याख्याकारः सम्पादकश्च प्रो० जयशङ्करलाल त्रिपाठी, प्रस्तावकः डॉ० विश्वनाथ भट्टाचार्यः, चतुर्थं संस्करणम्, कृष्णदास अकादमी, सम्बत् २०५९ (सन् २००२), वाराणसी (कृष्णदास संस्कृत सीरीज-८९)।

सातवाहन, हालः। *गाथासप्तशती (संस्कृतगाथासप्तशती)।* भट्टश्री-मथुरानाथशर्मणा संग्रथिता स्वविचरितव्यङ्ग्यसर्वङ्कषाव्याख्यया संवलिता च, मोतीलाल बनारसीदास, १९७३।